National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 298-301
© 2025 NJHSR
www.sanskritarticle.com

**ए. आर्पितावर्षिणी**
शोधच्छात्रा,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**ए. आर्पितावर्षिणी**
शोधच्छात्रा,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# प्रत्ययलोपे प्रत्ययलक्षणम्

**ए. आर्पितावर्षिणी**

**शोधसारः**

"प्रत्ययलोपे प्रत्ययलक्षणम्"[1] इति पाणिनीयसूत्रं व्याकरणशास्त्रे महत्त्वपूर्णपरिभाषारूपेण प्रतिष्ठितम् अस्ति। प्रस्तुते शोधलेखे महाभाष्याधारितया अस्य सूत्रस्य स्वरूपं, प्रयोजनं तथा प्रत्ययग्रहणद्वयस्य आवश्यकता विशदीकृता। प्रथमप्रत्ययग्रहणस्य प्रयोजनविषये भाष्ये निरूपितानां पूर्वपक्षसिद्धान्तानां समीक्षया दर्शितं यत् प्रत्ययलक्षणं केवलं प्रत्ययनिमित्तककार्येष्वेव प्रवर्तते, न तु प्रत्ययस्य पुनः प्रादुर्भावं बोधयति। तदनन्तरं कृत्स्नप्रत्ययलोपे एव प्रत्ययलक्षणस्य प्रवृत्तिः, न तु एकदेशलोपे, इति सिद्धान्तः आघ्नीत-संग्मीयादिप्रयोगैः समर्थितः। द्वितीयप्रत्ययग्रहणस्य प्रयोजनमपि विविच्य प्रत्ययनिमित्त-ककार्यस्य वर्णनिमित्तककार्याच्च भेदः प्रदर्शितः। अन्ततः सूत्रस्य मर्यादा, तस्य प्रयोगक्षेत्रं तथा महाभाष्यकाराणां तर्कपद्धतिः उदाहरणैः सह सम्यगुपपादिता इति निष्कर्षः प्राप्तः।

**प्रस्तावना**

पाणिनीयव्याकरणे परिभाषासूत्राणां विशेषमहत्त्वमस्ति। तेषु "प्रत्ययलोपे प्रत्ययलक्षणम्" (१.१.६२) इति सूत्रं प्रत्ययलोपोत्तरकाले अपि प्रत्ययनिमित्तककार्यसिद्ध्यर्थं प्रवर्तते। अस्य सूत्रस्य प्रयोगक्षेत्रं, मर्यादा तथा तत्र प्रयुक्तयोः प्रत्ययग्रहणयोः प्रयोजनं महाभाष्ये विस्तरेण विचारितम् अस्ति। सूत्रस्य सामान्यार्थात् आरभ्य विविधपूर्वपक्षान् प्रस्तुत्य भाष्यकारैः तेषां समाधानं कृतम्। विशेषतः सौरथी, वैहती, जगत्, जनगत्, आघ्नीत, संग्मीय, गोहितम्, रैकुलम् इत्यादीनां रूपाणामाधारेण प्रत्ययलक्षणस्य स्वरूपं, कृत्स्नप्रत्ययलोपे तस्य प्रवृत्तिः, एकदेशलोपे अप्रवृत्तिः, प्रत्ययनिमित्तककार्येष्वेव तस्य विषयता च निरूपिता। अयं लेखः महाभाष्यगतविचारप्रवाहमनुसृत्य सूत्रस्य तात्पर्यं तथा प्रत्ययग्रहणद्वयस्य प्रयोजनं समीक्षात्मकदृष्ट्या विवेचयति।

**कूटशब्दाः**

अन्तरङ्गकार्यं, तन्निमित्तककार्याणां प्रवृत्तिः, प्रत्ययनिमित्तककार्यपरत्वम्, प्रत्ययग्रहणम्, तत्तत्प्रवृत्ति-निमित्तककार्यप्रवृत्तिः, गोत्रापत्यम्, स्त्रियाम्, सैरथी, वैहती, करणसाधनव्याख्यानम्, औत्तरपदिक-ह्रस्वत्वम्, अनुनासिकलोपः, एकदेशलोपः, इत्यादयः॥

**मुख्यप्रतिपादकविषयः**

"प्रत्ययलोपे प्रत्ययलक्षणम्" इति सूत्रस्यायमर्थः—प्रत्ययस्य लोपे सत्यपि तन्निमित्तककार्याणां प्रवृत्तिर्न निवर्तते, अपितु प्रत्ययस्य सत्त्वमिव कल्प्य तदाश्रितविधयः प्रवर्तन्ते। "प्रत्ययस्य लोपः" इति षष्ठीतत्पुरुषसमासेन प्रत्ययलोपशब्दः निष्पद्यते। "प्रत्ययः लक्षणं निमित्तं यस्य तत्" इति बहुव्रीहिसमासेन प्रत्ययलक्षणशब्दस्य प्रत्ययनिमित्तककार्यपरत्वं बोध्यते। अतः प्रत्ययलोपावस्थायामपि प्रत्ययनिमित्तकविधीनामनुवृत्तिः इति सूत्रस्य तात्पर्यम्।

यथा “राजा” इत्यत्र सु-प्रत्ययस्य लोपे विहितेऽपि तस्य प्रत्ययस्य पदसंज्ञानिमित्तत्वं न निवर्तते। तेन प्रत्ययलक्षणेन पदान्तत्वस्य सिद्धेः पदान्ताश्रितो नलोपादिर्विधिः प्रवर्तते। एवं च प्रत्ययस्य अदर्शनमात्रेण तन्निमित्तककार्यनिवृत्तिरिति न मन्तव्यम्।

अत्र महाभाष्यकारैः “प्रथमप्रत्ययग्रहणं किमर्थम्”[2] इति शङ्का समुत्थाप्यते। “लोपे प्रत्ययलक्षणम्” इत्येव यदि सूत्रं स्यात्, तर्ह्यपि प्रत्ययनिमित्तककार्यस्य लोपावस्थायामनुवृत्तिरिति अर्थः सिध्येदेव। यतो हि प्रत्यासत्तिबलात् “प्रत्ययस्य लोपे” इत्यर्थस्य सहजमेव लाभः सम्भवति। अतः “प्रत्यय” इति पदस्य पृथगुपादानं निरर्थकमेव स्यादिति शङ्कायाः स्वरूपम्।

अस्याः शङ्कायाः मूलमिदं यत्—यद्यपि सूत्रे प्रत्ययग्रहणं क्रियते, तथापि तत्तत्प्रत्ययलोपे तत्तत्प्रत्ययनिमित्तककार्यप्रवृत्तिनियमार्थं प्रत्यासत्तेः आश्रयणम् अवश्यं करणीयम्। अन्यथा एकस्य प्रत्ययस्य लोपे अन्यप्रत्ययनिमित्तकविधीनामपि प्रसङ्गः स्यात्। उदाहरणतया “राजा” इत्यत्र सु-प्रत्ययस्य लोपे सति ङे-प्रत्ययनिमित्तकानामपि कार्याणां प्रवृत्तिः स्यात्। तादृशः प्रसङ्गस्तु शास्त्रविरुद्धः। अतः प्रत्यासत्तिवशात् यः प्रत्ययः लुप्यते, तस्यैव निमित्तकं कार्यं भवतीति नियमः स्वीकर्तव्यः।

एवं च प्रत्यासत्तेः अवश्याश्रयणीयत्वे सति “प्रत्यय” इति पदग्रहणेन किमधिकं प्रयोजनमिति पूर्वपक्षिणः प्रश्नः। तस्याभिप्रायः—यत् कार्यं प्रत्यासत्तिमात्रेणैव सिद्ध्यति, तत्र पुनः प्रत्ययग्रहणस्य विशेषप्रयोजनाभावात् तत् व्यर्थमिव प्रतिभातीति।

अत्र समाधानमाह भाष्यकारः। यदि “लोपे प्रत्ययलक्षणम्” इत्येव सूत्रं स्यात्, तर्हि तस्य अर्थः “प्रत्ययस्य लक्षणं दर्शनं वा प्रादुर्भावो लोपेऽपि भवति” इति षष्ठीतत्पुरुषसमासाश्रयेणापि कल्पयितुं शक्येत। अन्यपदार्थप्रधानस्य बहुव्रीहेरपेक्षया वर्तिपदार्थप्रधानत्वात् षष्ठीतत्पुरुषस्य लाघवम् अधिकमिति कृत्वा प्रथमं तस्यैवार्थस्य सम्भावना जायते। एवं च “यस्य लोपः सञ्जातः, स प्रत्ययः तल्लोपेऽपि पुनः प्रादुर्भवति” इति सूत्रार्थः स्यात्।

किन्तु एवं व्याख्याने महद्दोषप्रसङ्गः। तदेव भाष्यकारः “सौरथी वैहतीत्यादौ गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत”[3] इति वदन् प्रदर्शयति। सुपूर्वकात् रमधातोः क्थन्-प्रत्यये तथा विपूर्वकात् हन्-धातोः क्त-प्रत्यये च “अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपः”[4] इत्यादिना मकारतकारयोर्लोपे कृते क्रमशः सुरथ तथा विहत इति शब्दौ निष्पद्येते। तयोः गोत्रापत्यार्थे स्त्रियाम् अत इञ् विहिते सौरथि, वैहति इति रूपे सिद्ध्यतः।

अत्र गुरूपोत्तमलक्षणस्य ष्यङादेशस्य प्रसङ्गो न भवति, यतः सौरथि, वैहति इत्येतयोः रूपयोः गुरूपोत्तमत्वाभावः। किन्तु यदि लुप्तप्रत्ययस्य पुनः प्रादुर्भावः प्रत्ययलक्षणेन स्वीक्रियेत, तर्हि लुप्तयोः नकारतकारयोः पुनरुपस्थित्या सौरन्थि, वैहन्ति इत्यवस्था कल्प्येत। तदा गुरूपोत्तमत्वात् ष्यङादेशः स्यात्, फलतः सौरथ्या, वैहत्या इत्यनिष्टरूपप्रसङ्गः आपद्येत।

न चैतदिष्टम्। व्याकरणशास्त्रे “इतो मनुष्यजातेः”[5] इति सूत्रेण ङीषि विहिते सौरथी, वैहती इत्येते एव साधुरूपे इष्येते। अतः प्रत्ययस्य पुनः प्रादुर्भावपरकः सूत्रार्थः असंगतः।

अथ च यदि सूत्रे “प्रत्यय” इति ग्रहणं क्रियते, तर्हि अयं दोषः न भवति। यतो हि तदा “प्रत्ययलक्षणम्” इति पदस्य प्रत्ययनिमित्तक-कार्यपरत्वमेव स्वीक्रियते, न तु प्रत्ययस्य पुनः प्रादुर्भावः। अन्यथा प्रत्ययस्य लोपविधानमेवानर्थकं स्यात्, लोपोक्तस्य प्रत्ययस्य पुनरुत्पादनात्। अतः षष्ठीतत्पुरुषार्थस्य परित्यागेन बहुव्रीहिसमास एव आश्रयणीयः।

तस्मादस्य सूत्रस्य युक्तोऽर्थः—“प्रत्ययनिमित्तकं कार्यं प्रत्ययलोपेऽपि भवति” इति। प्रकृते च सौरथी, वैहती इत्यत्र प्रत्ययनिमित्तकं किमपि कार्यं न विद्यते, अतः प्रत्ययलक्षणस्यापि प्रसङ्गो न भवति। एवं च प्रथमप्रत्ययग्रहणस्य साफल्यं सिद्ध्यति, तथा च “प्रत्यय” इति पदोपादानम् आवश्यकमेवेति निष्कर्षः।

अत्र पुनः पूर्वपक्षी प्रतिपद्यते यत्, एवं व्याख्यानेऽपि प्रथमस्य “प्रत्यय”ग्रहणस्य प्रयोजनं न स्पष्टतया सिद्ध्यति। यदि ‘लोपे प्रत्ययलक्षणम्’ इत्यस्यार्थः ‘लोपे सति प्रत्ययनिमित्तकं कार्यं प्रवर्तते’ इति स्वीक्रियते, तर्हि ‘लक्षण’शब्दस्य ‘लक्ष्यते अनेनेति’ इति करणसाधनव्युत्पत्तिराश्रयणीया भवति। न तु ‘लक्ष्यते’ इति भावसाधनव्युत्पत्तिः। अन्यथा प्रत्ययग्रहणस्य सत्त्वेऽपि संशयो न निवर्तेत। यतः यदि भावसाधनव्युत्पत्तिरङ्गीक्रियते, तर्हि ‘प्रत्ययलोपे प्रत्ययस्य प्रादुर्भावः’ इत्यर्थो विरुद्धत्वात् नोपपद्यते। लुप्तस्य प्रत्ययस्य पुनः प्रादुर्भावकल्पना हि लोपविधानस्यैवानर्थक्यं जनयेत्। अतः तस्मिन्नर्थे बाधे सति ‘प्रत्ययलोपे प्रत्ययान्तरस्य प्रादुर्भावः’ इत्यर्थकल्पना प्रसज्येत। एवं च ग्रामणीरित्यत्र क्विप्प्रत्ययस्य लोपे स्वादिप्रत्ययोत्पत्तेः सम्भावना स्यात्। तस्य परिणामस्वरूपम् अधोगीत्यादिषु पदसंज्ञाया अनुपपत्तिरपि स्यात्; यतः तत्र तिङन्तत्वाभावेन पदत्वमेव न सिध्येत्।

अतः करणसाधनव्याख्यानमेव ग्राह्यमिति सिद्धान्तिनः अभिप्रायः। ‘लोपे प्रत्ययलक्षणम्’ इति सूत्रे ‘लक्षण’शब्दस्योपादानसामर्थ्यात् करणसाधनत्वमेव युक्ततरं दृश्यते। यदि तदभिप्रेतं न स्यात्, तर्हि सूत्रकारेण केवलं ‘लोपे प्रत्ययः’ इत्येवोक्तुं शक्येत। ‘लक्षण’पदस्य विशेषोपादानात् अनेन प्रत्ययनिमित्तककार्यस्यैव बोधनं क्रियते, न तु प्रत्ययस्य पुनः प्रादुर्भावस्य।

एवं सति सूत्रार्थः ‘प्रत्ययलोपेऽपि प्रत्ययनिमित्तकं कार्यं प्रवर्तते’ इत्येव पर्यवस्यति। तदनुसारं सौरथी, वैहती इत्यादिषु प्रत्ययनिमित्तस्य कस्यापि कार्यस्याभावात् प्रत्ययलक्षणप्रसङ्गो न भवति, न च कश्चिद्दोषः प्रसज्यते। अत एव पुनरपि पूर्वपक्षी मन्यते यत्, एतादृशेऽर्थे सिद्धे प्रथमस्य ‘प्रत्यय’ग्रहणस्य पृथक् प्रयोजनं न दृश्यते, अतः तत् व्यर्थमेव इति।

अत्र केचन मन्यन्ते यत् प्रथमप्रत्ययग्रहणस्य प्रयोजनं अन्यथापि वक्तुं शक्यते। तेषां मते "प्रत्ययलोपे प्रत्ययलक्षणम्" इति सूत्रे 'प्रत्यय'शब्दः लुप्तसप्तमीकः। अतः सूत्रच्छेदः "प्रत्यये, लोपे, प्रत्ययलक्षणम्" इति भवति। एवं च 'प्रत्यये सति यत्कार्यं प्राप्नोति, तत् प्रत्ययस्य लोपेऽपि प्रत्ययलक्षणेन भवति; किन्तु लोपोत्तरकाले नव्येन निमित्तेन यत्कार्यं प्राप्नोति, तत् प्रत्ययलक्षणेन न भवति' इति सूत्रार्थः सम्पद्यते।

अस्य व्याख्यानस्य प्रयोजनं ग्रामणिकुलम्, सेनानिकुलम् इत्यादिषु रूपेषु दृश्यते। "ग्रामण्यः कुलम्", "सेनान्यः कुलम्" इति षष्ठीतत्पुरुषसमासे ग्रामणीकुल, सेनानीकुल इति रूपे सिद्धे "इको ह्रस्वोऽङ्यो गालवस्य"[6] इति सूत्रेण औत्तरपदिकह्रस्वत्वं भवति। तदनन्तरं "ह्रस्वस्य पिति कृति तुक्"[7] इति सूत्रेण तुकागमस्य प्रसङ्गः स्यात्। किन्तु स तुक् न भवितुमर्हति, यतः ग्रामणी, सेनानी इत्यत्र क्विप्प्रत्यये विद्यमाने ह्रस्वत्वाभावात् तुकागमो न दृश्यते। यदि क्विपः लोपानन्तरं जातं ह्रस्वत्वं प्रत्ययलक्षणेन ग्राह्यं स्यात्, तर्हि अनिष्टतुक्प्रसङ्गः स्यात्। तस्मात् प्रत्यये सति यत्प्राप्तं तदेव प्रत्ययलक्षणेन भवतु, न तु लोपोत्तरकालनिमित्तप्राप्तं कार्यमिति अयं पक्षः।

किन्त्वयं पक्षोऽपि न सम्यगुपपद्यते। यतः एवं व्याख्याने जगत्, जनगत् इत्यादिरूपाणां सिद्धिः बाध्येत। "गच्छतीति जगत्" इत्यत्र गम्-धातोः क्विप्प्रत्यये विहिते, "द्युतिगमिजुहोतीनां द्वे च"[8] इति वार्तिकेन द्वित्वं, ततः अभ्यासलोपः, "वेरपृक्तस्य"[9] इति विलोपः, "गमः क्वाविति"[10] इति मलोपश्च क्रमेण भवति। अत्र मलोपः अङ्गविशेषापेक्षत्वात् बहिरङ्गः, विलोपस्त्वन्तरङ्गः। अतः अन्तरङ्गकार्यस्य पूर्वप्रवृत्त्या विलोपे कृते पश्चान्मलोपः सम्पद्यते।

एवं स्थिते क्विप्प्रत्यये विद्यमाने ह्रस्वान्तत्वाभावात् तुकागमः न प्राप्नोति। यदि प्रत्ययलक्षणं केवलं प्रत्ययसत्त्वकाले प्राप्तकार्येष्वेव प्रवर्तेत, तर्हि क्विपः लोपानन्तरं तुकागमोऽपि न स्यात्। फलतः 'जगत्' इति सिद्धरूपमेव न निष्पद्येत। एष एव दोषः "जनं गच्छतीति जनगत्" इत्यत्रापि समानरूपेण प्रसज्यते।

न च ग्रामणिकुलम्, सेनानिकुलम् इत्यादीनि उदाहरणानि अत्र साधकानि भवन्ति। यतः तत्र ह्रस्वत्वं बहिरङ्गकार्यं, तुक् तु अन्तरङ्गकार्यं भवति। असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषया बहिरङ्गस्य ह्रस्वत्वस्य असिद्धत्वात् तुकागमः स्वयमेव न भवति। अतः तदर्थं पृथक् प्रत्ययग्रहणकल्पना न आवश्यकते।

तस्मादेवंविधा व्याख्या न युक्ता। न च एतस्याः साहाय्येन प्रथमप्रत्ययग्रहणस्य प्रयोजनं सम्यक् निरूपयितुं शक्यते। अत एव पूर्वपक्षी पुनरपि निष्कर्षरूपेण वदति यत् प्रथमस्य "प्रत्यय"ग्रहणस्य प्रयोजनं नोपपद्यते, अतः तत् व्यर्थमेव इति।

अत्र सिद्धान्ती प्रत्यवदति यत् प्रत्ययग्रहणस्य प्रयोजनमस्त्येव। तस्य प्रयोजनं कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणस्य प्रवृत्तिः, न तु प्रत्ययस्य एकदेशलोपे इति। अर्थात् यदा सम्पूर्णः प्रत्ययः लुप्यते तदा तन्निमित्तककार्याणि प्रत्ययलक्षणेन भवन्ति, किन्तु प्रत्ययस्य केवलैकदेशस्य लोपे तादृशः प्रसङ्गो न भवति।

अस्य उदाहरणत्वेन "आघ्नीत" इति रूपं प्रदर्श्यते। आङ्पूर्वकात् हन्-धातोः विधिलिङि प्रथमपुरुषैकवचने आत्मनेपदप्रत्यये विहिते "आङो यमहनः" इति सूत्रेण सीयुडागमः भवति। ततः सुडागमस्यापि विधाने सति सकारद्वयस्य लोपे "आ हन् ईय् त" इत्यवस्था सम्पद्यते। यदि अत्र सीयुटः सकारलोपमात्रेऽपि प्रत्ययलक्षणं स्वीक्रियेत, तर्हि शिष्टस्य प्रत्ययभागस्य झलादित्वेन क्ङित्परकत्वं स्यात्। तस्माच्च "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" इत्यादिना सूत्रेण हन्-धातोः[11] अनुनासिकलोपः प्रसज्येत। तदानीं "आघ्नीत" इति सिद्धरूपस्य स्थाने अन्यदनिष्टरूपं स्यात्।

किन्तु अत्र प्रत्ययस्य कृत्स्नलोपो न जातः, केवलमेकदेशलोप एव प्रवृत्तः। अतः प्रत्ययलक्षणस्याप्रवृत्त्या झलादिक्ङित्परकत्वं न सिध्यति, फलतः अनुनासिकलोपोऽपि न भवति। एवं "आघ्नीत" इति साधुरूपसिद्धिः निर्विघ्ना भवति।

एवमेव "संग्मीय" इति वैदिकप्रयोगोऽपि अस्य सिद्धान्तस्य समर्थनं करोति। अत्र यदि एकदेशलोपेऽपि प्रत्ययलक्षणं स्वीक्रियेत, तर्हि रूपसिद्धौ बाधः प्रसज्येत। किन्तु कृत्स्नप्रत्ययलोपे एव प्रत्ययलक्षणस्य प्रवृत्तिरङ्गीकृता इति कारणात् तत्र शपः लुग्विधानं सम्यगुपपद्यते, वैदिकप्रयोगश्च यथावत् संरक्ष्यते।

अतः सूत्रे प्रथमस्य "प्रत्यय"ग्रहणस्य प्रयोजनं कृत्स्नप्रत्ययलोपस्य ग्रहणार्थमिति ज्ञायते। तेन प्रत्ययलक्षणस्य विषयः परिसीम्यते, एकदेशलोपे तस्य अप्रवृत्तिश्च सुनिश्चितीभवति। एवं च आघ्नीत, संग्मीय इत्यादिरूपसिद्धिः निर्विघ्नतया सम्पन्ना भवति।

इदानीं सूत्रस्थस्य द्वितीयस्य प्रत्ययग्रहणस्य प्रयोजनं परीक्ष्यते। तदुच्यते—प्रत्ययलक्षणस्यैव प्रवृत्त्यर्थं, न तु वर्णलक्षणस्यापि प्रवृत्त्यर्थम्। अर्थात् प्रत्ययलोपे प्रत्ययनिमित्तकमेव कार्यं भवेत्, वर्णविशेषनिमित्तकं कार्यं तु न भवेदिति द्वितीयप्रत्ययग्रहणस्य तात्पर्यम्।

अस्य विषयस्य स्पष्टीकरणार्थं "गोहितम्" तथा "रैकुलम्" इत्येतयोः उदाहरणत्वेन निर्देशः क्रियते। "गवे हितम्" इति विग्रहे गोहितम्, "रायः कुलम्" इति विग्रहे रैकुलम् इति रूपे सिद्ध्यतः। अत्र यदि सूत्रे केवलं "प्रत्ययलोपे तल्लक्षणम्" इत्येवोच्येत, तर्हि प्रत्ययस्य निमित्तत्वं यत्र यत्र कार्ये प्रत्ययस्वरूपेण अथवा प्रत्ययावयवभूतवर्णद्वारेण भवति, तत्र सर्वत्र प्रत्ययलक्षणस्य प्रवृत्तिः स्यात्।

वस्तुतस्तु गोहितम्, रैकुलम् इत्यादिषु रूपेषु अय्, अव् इत्यादेशौ वर्णविशेषाश्रितौ स्तः। तथापि तत्र प्रत्ययस्य अवयवद्वारेण निमित्तभावोऽपि कश्चित् कल्पयितुं शक्यते। यदि वर्णनिमित्तककार्येष्वपि प्रत्ययलक्षणं प्रवर्तेत, तर्हि अत्रापि तद्विधानस्य प्रसङ्गः स्यात्।

किन्तु सूत्रकारेण पुनः "प्रत्यय" इति पदस्य ग्रहणात् एष दोषः परिह्रियते। तस्य फलमिदं यत् प्रत्ययलोपे केवलं प्रत्ययत्वेन निमित्तीकृतं कार्यमेव प्रवर्तते, न तु प्रत्ययावयवभूतवर्णनिमित्तकं

कार्यम्। अन्यथा प्रत्ययाश्रयवर्णद्वारेणापि बहूनां कार्याणां प्रसङ्गः स्यात्।

अतः अयवायावादयः आदेशाः यद्यपि प्रत्ययावयववर्णसम्बन्धेन प्रवर्तन्ते, तथापि ते प्रत्ययत्वाश्रिताः न भवन्ति। तस्मात् तेषां विषये प्रत्ययलक्षणस्य प्रवृत्तिरपि न भवति। एवं च गोहितम्, रैकुलम् इत्यादिषु कश्चिदनिष्टदोषः न प्रसज्यते।

तस्माद् द्वितीयप्रत्ययग्रहणस्य प्रयोजनम् एतदेव यत् प्रत्ययलक्षणस्य क्षेत्रं प्रत्ययनिमित्तककार्येष्वेव सीम्यते, वर्णनिमित्तककार्येषु तस्य अप्रवृत्तिः सुनिश्चितीक्रियते। एवं च सूत्रार्थस्य मर्यादा सम्यगवधार्यते तथा च अनिष्टप्रसङ्गानां निरासः सुलभतया भवति।

**उपसंहारः**

"प्रत्ययलोपे प्रत्ययलक्षणम्" इति सूत्रस्य महाभाष्यसम्मतविवेचनेन प्रत्ययग्रहणद्वयस्य प्रयोजनं सम्यगुपपादितम्। तेन कृत्स्नप्रत्ययलोपे एव प्रत्ययनिमित्तकार्यप्रवृत्तिः, न तु एकदेशलोपे अथवा वर्णनिमित्त-कार्येषु इति सिद्धान्तः सुस्पष्टतया प्रतिष्ठापितः।

**सहायकग्रन्थसूची**


- अष्टाध्यायी - पाणिनिः
- वैयाकरणसिद्धान्तकौमुदी - भट्टोजी दीक्षितः
- व्याकरणमहाभाष्यम् - पतञ्जलिः
- महभाष्यप्रदीपः - कैयटः
- परिभाषेन्दुशेखरः - नागेशभट्टः
- लघुशब्देन्दुशेखरः – नागेशभट्टः


**पाद टिप्पणी**

1. अष्टाध्यायी १.१.६२
2. व्याकरणमहाभाष्यम् अ-१.पा-१.आ-८
3. व्याकरणमहाभाष्यम् अ-१.पा-१.आ-८
4. अष्टाध्यायी ६.४.३७
5. अष्टाध्यायी ४.१.६५
6. अष्टाध्यायी ६.३.६१
7. अष्टाध्यायी ६.१.७१
8. वैयाकरणसिद्धान्तकौमुदी ३१५८
9. अष्टाध्यायी ६.१.६७
10. अष्टाध्यायी ६.४.४०
11. कौमुदीधातुः १०१२